**बादरिक** त्रि० बदराण्युञ्छति बदर–ठक्। बदरफलस्य भूमौ पतितस्यैकैकग्राहिणि।

**बाध** विहतौ भ्वादि०आत्म०सक० सेट्। बाधते अबाधिष्ट। ऋदित् चङि न ह्रस्वः अबबाधत् त।

**बाध** पु० बाध भावे-घञ्। १प्रतिरोधे। २प्रतिबन्धे, पीड़ने, ३उपद्रवे च। न्यायमते ४साध्याभाववत्पदार्थे यथा वह्न्यनुमितौ वह्न्यभाववान् ह्रदो बाधः। "साध्याभाववत्त्वप्रमाविषयपक्षत्वम्" तल्लक्षणम्। ५हेतुदोषभेदे अनुचिन्ता० बाध-कर्त्तरि अच्। ६प्रतिबन्धके त्रि०।

**बाधक** त्रि० बाध–ण्वुल्। १प्रतिबन्धके। २स्त्रीणामृतुकाले प्रजाजननशक्तिप्रतिरोधके रोगभेदे पु०।

स च रोगश्चतुर्विधस्तल्लक्षणं वैद्यके उक्तं यथा

"व्यथा कट्यां तथा नाभेरधः पार्श्वे स्तनेऽपि च। रक्तमाड्रीप्रदोषेण जायते फलहीनता। मासमेकं द्वयं वापि ऋतुयोगो भवेद्यदि। रक्तमाड्री१प्रदोषेण फलहीना तदा भवेत्। नेत्रे हस्ते भवेज्ज्वाला योनौ चैव विशेषतः। लालासंयुक्तरक्तञ्च षष्ठी बाधकयोगतः। मासैकेन भवेद् यत्र ऋतुस्नानद्वयं तथा। मलिना रक्तयोनिः स्यात् षष्ठीबाधकयोगतः। उद्वेगो गुरुतादेहे रक्तस्रावो भवेद्बहुः। नाभेरधो भवेत् शूलं चाङ्कुरः२ स तु बाधकः। ऋतुहीना चतुर्मासं त्रिमासं वा भवेद्यदि। कृशाङ्गी करपादे च ज्वाला चाङ्कुरयोगतः। सशूला च सगर्भा च शुष्कदेहाल्परक्तिका। जलकुमारस्य४ दोषेण जायते फलहीनता। या कृशाङ्गी भवेत् स्थूला बहुकालऋतुस्तथा। गुरुस्तनी स्वल्परक्ता जलकुमारस्य दूषणात्" वैद्यकम्। [बन्धे च।

**बाधन** न० बाध–भावे ल्युट्। १पीड़ायां शब्दर०। २प्रति-

**बाधा** स्त्री बाध–भावे १अपीड़ायां २निषेधे ३प्रतिबन्धे च।

**बाधित** त्रि०बाध–कर्मणि क्त।१प्रतिबद्धे।२बाधज्ञानविषये च

**बाधिर्य्य** न० बधिरस्य भावः ब्राह्मणादित्वात् ष्यञ्। श्रवणशक्तिराहित्ये रोगभेदे बधिरशब्दे दृश्यम्।

**बान्धकिनेय** पु०स्त्री०बन्धक्याः अपत्यं ढक् इनङ् च। असत्या अपत्ये अमरः।

**बान्धव** पु० बन्धु+स्वार्थे, इदमर्थे वाऽण्। १बन्धुशब्दार्थे, २पितृमातृसम्बन्धिनि ३भ्रातरि ४मातुलादौ च। "बान्धवास्तद्वाप्नुयुः" कात्या० स्मृतिः। [सुते हेमच०

**बार्बटीर** पु० १रङ्गे धातौ २आम्रास्थ्नि, ३अङ्कुरे ४गणिका-

**बार्हत** न० बृहत्याः फलम् लक्षा० अण्। १बृहतीफले बृहतिभवः उत्सा० अञ्। २बृहतिभवे त्रि०।

**बार्हदग्न** पुंस्त्री० बृहदग्नेरपत्यम् कण्वा० अण्। बृहदग्निनामकर्षिगोत्रापत्ये। [न्यपसुते २तत्सम्बन्धिनि त्रि०।

**बार्हद्रथ** पुंस्त्री० बृहद्रथस्यापत्यम् शैकिकोऽण्। १बृहद्रथ-

**बार्हस्पत** पु० बृहस्पतेरिदम् सवदेवताऽस्य इ–अण्। गुरुसम्बन्धिनि १वत्सरे २चर्वादौ च। पत्यन्तत्वात् पुरोहिता०यक्। बार्हस्पत्य तत्रार्थे त्रि०। "बार्हस्पत्येन षष्ट्यब्दं ज्ञेयं नान्यैस्तु नित्यशः" स्मृ०सि०।

**बार्हिण** त्रि० बर्हिणो विकारः ताला० अण्। बर्हिविकारे।

**बाल** पु०न० बालाख्ये १गन्धद्रव्यभेदे। २मूर्खे ३शिशौ मेदि० "बाल आषोड़शात् वर्षात्" स्मृतिपरिभाषित ४षोड़शवर्षावधिकवयस्के च त्रि०। ५केशे पु० अमरः। अर्श आदित्वादस्त्यर्थे अच्। ६अश्वशिशौ अमरः ७अश्वबालधौ ८हस्तिबालधौ ९नारिकेले मेदि० १०पशुपुच्छे च पु० हेमच०। मत्स्यभेदे शब्दच०। "पञ्चवर्षो गता कालः" हेम० उक्ते पञ्चवयस्कापदे।

"बालाचतुष्टयं शीतं मधुरं बलकान्तिकृत्। स्निग्धं ग्राहि समीरास्रपित्तास्रक्षयनाशनम्"। "बलामूलत्वचश्चूर्णं पीतं सक्षीरशर्करम्। मूत्रातिसारं हरति दृष्टमेतन्न संशयः। हरेन्महाबला कृच्छ्रं भवेद्वातानुलोमनी। हन्यादिति बलामोहं पयसा सितया सह" भावप्र०।

बालादेरवधिमाह सुश्रुतः "वयस्तु त्रिविधं बाल्यं मध्यमं वार्द्धकं तथा। ऊनषोड़शवर्षस्तु नरो बालो निगद्यते। त्रिविधः सोऽपि दुग्धाशी दुग्धान्नाशी तथान्नभुक्। दुग्धाशी वर्षपर्य्यन्तं दुग्धान्नाशी शरद्द्वयम्। तदुत्तरं स्यादन्नाशी एवं बालस्त्रिधामतः"।

"यथोक्त विधिना बालं मासि षष्टेऽष्टमेऽपि च। अन्नं सम्प्राशयेत्किञ्चित् ततस्तद्वर्द्धयन् क्रमात्" अथ बालस्य परिचर्य्याविधिः। "बालमङ्के सुखन्दध्यात् नचैनन्तर्जयेत् क्वचित्। सहसा बोधयेन्नैव नायोग्यं समुपवेशयेत्" अयोग्यं उपवेशनासमर्थम्। "नाकस्मात् स्थापयेत् क्रोड़े न क्षिप्रं शयने क्षिपेत्। रोदयेन्न क्वचित् कार्य्यं विधिमावश्यकं विना" आवश्यको विधिः सेचन दान तैलाभ्यङ्गोद्वर्त्तनादिः। "तच्चित्तमनुवर्त्तेत तं सदैवानुमोदयेत्। निम्नोच्चस्थानतश्चापि रक्षेद् बालं प्रयत्नतः" बालस्य स्वभावहितान्याह। "अभ्यङ्गोद्वर्त्तनं स्नानं नेत्रयोरञ्जनन्तथा। वसनं मृदु यत् तच्च तथा मृदनुलेपनम्। जन्मप्रभृतिपथ्यानि बालस्यैतानि सर्वथा"